# 2021

## SANSKRIT — GENERAL

**Paper : DSE-2**

**(Indian Perspectives in Personality Development)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**Section – B**

**(Marks : 30)**

1. अधोनिर्दिष्टेषु **कस्यचिदेकस्य** उत्तरं संस्कृतभाषया देवनागरीलिप्या च दातव्यम्। 10×1

(a) "आचार्य महतीं चमूम्"—अत्र वक्ता कः? "आचार्य" इति कस्य सम्बोधनम्? "महती चमू"-इति कस्य वर्णनम्? कौरवाणां पाण्डवानां च सेनानीनाम् शङ्खनिनादं वर्ण्यताम्। 1+1+3+5

(b) ".... क्षेत्रमित्यभिधीयते"—अत्र किं क्षेत्रम्, क्षेत्रज्ञः च कः? इन्द्रियाणि कति? अत्र स्वाधीतग्रन्थमाश्रित्य विचार्यताम्। 2+2+6

(c) "ममैवांशो जीवलोके..." अत्र 'मम' इति पदेन किमुच्यते? जीवलोकः कः? जीवभूतः कः? तस्य जीवस्य विषये गीतायां पाठ्यांशे यदुक्तं तत् विलिख्यताम्। 2+2+2+4

2. अधोलिखितेषु ***पञ्च*** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः— 2×5

(a) महाभारतस्य युद्धं कुत्र अभवत्? तस्य स्थानस्य एकम् अपरं नाम किम्?

(b) पाण्डवानां सेनायकः कः? कौरवाणां च सेनानीः कः?

(c) भीमस्य युधिष्ठिरस्य च शंखस्य नाम किम्?

(d) प्रकृतिपुरुषविज्ञानस्य च किं फलम्?

(e) गीतायाः प्रथमाध्यायस्य नाम किम्?

(f) अक्षरः पुरुषः क उच्यते?

(g) "तद्धाम परमं मम"— इति अत्र मम इति कः?

3. अधोलिखितेषु ***द्वयोः*** श्लोकयोः अनुवादः वङ्गभाषया आङ्ग्लभाषया वा कार्यः। 5×2

(a) "दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्।।"

**Please Turn Over**

(b) कार्यकारण कर्तृत्वे हेतुः प्रकृतिरुच्यते।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते।।

(c) उत्क्रामन्तं स्तितं वापि गुञ्जानं वा गुणान्वितम्।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः।।

## Section – C
### (Marks : 15)

**4.** अधोलिखितेषु ***द्वयोः*** टीका कार्या— 4×2

प्रवृत्तिः, सत्त्वगुणः, तामसी श्रद्धा, राजसः यज्ञः, मानसं तपः।

**5.** अधोलिखितेषु कस्य***चिदेकस्य*** प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या— 7×1

(a) सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।।

(b) त्रिविधा भवति श्रद्धा देहिनां सा स्वमावजा।
सात्त्विकी राजसी चैव तामसी चेति तां श्रृणु।।

(c) अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।

## Section – D
### (Marks : 20)

**6.** अधस्तनेषु ***द्वयोः*** प्रश्नयोः उत्तरं प्रदातव्यम्— 5×2

(a) "योगक्षेमं वहाम्यहम्"— कस्य उत्किरियम्? उत्केरस्याः किं तात्पर्यम्? 2+3

(b) "नियतं कुरु कर्म त्वम्"— अत्र वक्ता कः? त्वम् इति कमुद्दिश्य उक्तम्? कर्म कथं कर्त्तव्यमिति गीतोक्तदिशा वर्ण्यताम्। 1+1+3

(c) "तमाहुः पण्डितं बुधाः"— अत्र प्रसङ्गतः पण्डितस्य लक्षणं यदुक्तं तत् पर्यालोच्यताम्। 1+1+3

(d) गीतोक्तदिशा चतुर्वर्णानां स्वभावजं कर्म किमिति विचार्यताम्। 5

**7.** निम्नलिखितेषु ***द्वयोः*** श्लोकयोः अनुवादः वङ्गभाषया आङ्ग्लभाषया वा कार्याः— 5×2

(a) सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति।।

(b) अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते।।

(c) श्रेयान् स्वधर्मे विगुणः परधर्मात् स्वनुष्ठितात्।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्विषम्।।

(d) यत्रोपरमते चित्तं निरुद्धं योगसेवया।'
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति।।